শ্রীঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীমান্ ৱেঙ্কটনাথার্যঃ কৱিতার্কিককেসরী।
ৱেদান্তাচার্যৱর্যো মে সন্নিধত্তাং সদা হৃদি॥

শ্রী মেল্পপত্তূর্ নারাযণভট্টতিরি ৱিরচিতম্

# ॥শ্রীমন্নারাযণীযম্ ॥

## দশক - ৮১

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using Bengali for TEX.

শ্রীঃ
শ্রীমতে কৃষ্ণায পরব্রহ্মণে নমঃ
শ্রীমতে রামানুজায নমঃ

# ॥শ্রীমন্নারাযণীযম্ ॥

## দশক - ৮১

*সুভদ্রাহরণং কালিন্দ্যাদিৱিৱাহৱর্ণনং*
*নরকাসুরৱধৱর্ণনং চ*

স্নিগ্ধাং মুগ্ধাং সততমপি তাং লালযন্ সত্যভামাং
যাতো ভূযঃ সহ খলু তযা যাজ্ঞসেনীৱিৱাহম্।
পার্থপ্রীত্যৈ পুনরপি মনাগাস্থিতো হস্তিপুর্যাং
শক্রপ্রস্থং পুরমপি ৱিভো সংৱিধাযাগতোঽভূঃ॥ ১ ॥

ভদ্রাং ভদ্রাং ভৱদৱরজাং কৌরৱেণার্থ্যমানাং
ত্বদ্বাচা তামহৃত কুহনামস্করী শক্রসূনুঃ।
তত্র ক্রুদ্ধং বলমনুনযন্ প্রত্যগাস্তেন সার্ধং
শক্রপ্রস্থং প্রিযসখমুদে সত্যভামাসহাযঃ॥ ২ ॥

তত্র ক্রীডন্নপি চ যমুনাকূলদৃষ্টাং গৃহীত্বা
তাং কালিন্দীং নগরমগমঃ খাণ্ডৱপ্রীণিতাগ্নিঃ।
ভ্রাতৃত্রস্তাং প্রণযৱিৱশাং দেৱ পৈতৃষ্ৱসেযীং
রাজ্ঞাং মধ্যে সপদি জহৃষে মিত্রৱিন্দামৱন্তীম্॥ ৩ ॥

সত্যাং গত্বা পুনরুদৱহো নগ্নজিন্নন্দনাং তাং
বধ্বা সপ্তাপি চ ৱৃষৱরান্ সপ্তমূর্তির্নিমেষাত্।
ভদ্রাং নাম প্রদদুরথ তে দেৱ সন্তর্দনাদ্যা-
স্তত্সোদর্যা ৱরদ ভৱতঃ সাপি পৈতৃষ্ৱসেযী॥ ৪ ॥

পার্থাদ্যৈরপ্যকৃতলৱনং তোযমাত্রাভিলক্ষ্যং
লক্ষং ছিত্বা শফরমৱৃথা লক্ষ্মণাং মদ্রকন্যাম্।
অষ্টাৱেৱং তৱ সমভৱন্ ৱল্লভাস্তত্র মধ্যে
শুশ্রোথ ত্বং সুরপতিগিরা ভৌমদুশ্চেষ্টিতানি॥ ৫ ॥

স্মৃতাযাতং পক্ষিপ্ৰৱরমধিরূঢস্তৱমগমো
    ৱহন্নঙ্কে ভামামুপৱনমিৱারাতিভৱনম্।
ৱিভিন্দন্ দুৰ্গাণি ত্ৰুটিতপৃতনাশোণিতরসৈঃ
    পুরং তাৱত্ প্ৰাগজ্যোতিষমকুরুথাঃ শোণিতপুরম্॥ ৬ ॥

মুরস্তৱাং পঞ্চাস্যো জলধিৱনমধ্যাদুদপতত্
    স চক্ৰে চক্ৰেণ প্ৰদলিতশিরা মঙক্ষু ভৱতা।
চতুৰ্দন্তৈৰ্দন্তাৱলপতিভিরিন্ধানসমরং
    রথাঙকেন ছিত্বা নরকমকরোস্তীৰ্ণনরকম্॥ ৭ ॥

স্তুতো ভূম্যা রাজ্যং সপদি ভগদত্তেস্য তনযে
    গজঞ্চৈকং দত্বা প্ৰজিঘযিথ নাগান্নিজপুরীম্।
খলেনাবদ্ধানাং স্বগতমনসাং ষোডশ পুনঃ
    সহস্ৰাণি স্ত্ৰীণামপি চ ধনরাশিং চ ৱিপুলম্॥ ৮ ॥

ভৌমাপাহৃতকুণ্ডলং তদদিতেৰ্দাতুং প্ৰযাতো দিৱং
    শক্ৰাদ্যৈৰ্মহিতঃ সমং দযিতযা দ্যুস্ত্ৰীষু দত্তহ্ৰিযা।
হৃত্বা কল্পতরুং রুষাভিপতিতং জিত্বেন্দ্ৰমভ্যাগম-
    স্তত্তু শ্ৰীমদদোষ ঈদৃশ ইতি ৱ্যাখ্যাতুমেকাকৃথাঃ॥ ৯ ॥

কল্পদ্ৰুং সত্যভামাভৱনভুৱি সৃজন্ দৱ্যষ্টসাহস্ৰযোষাঃ।
    স্বীকৃত্য প্ৰত্যগারং ৱিহিতবহুৱপুৰ্লালযন্ কেলিভেদৈঃ।
আশ্চৰ্যান্নারদালোকিতৱিৱিধগতিস্তত্ৰ তত্ৰাপি গেহে
    ভূযঃ সৰ্ৱাসু কুৰ্ৱন্ দশ দশ তনযান্ পাহি ৱাতালযেশ॥ ১০ ॥

**********